# 2017

**M. A. 3rd Semester**

**SANSKRIT**

**PAPER–303**

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः सुरगिरा नागर्या समाधेयाः ।

1. अधोलिखितयोः कश्चिदेकः प्रश्नः समाधेयः । 10

क) 'साधकतमं करणम्'—इत्यत्र साधकशब्देन कः परामृश्यते ? सोदाहरणं सविभागञ्च तस्य लक्षणं निरूप्य 'पटरूपं प्रति पटः समवायिकारणं भवितुमर्हति न वेति विचार्यताम् ।

ख) का नाम प्रमा ? तत्र लक्षणघटकपदानां किं सार्थक्यम् ? न्यायमते प्रमा कतिविधा? काश्च ताः ? तत्र प्रत्यक्षप्रमायाः स्वरूपं संक्षेपतः निरूप्यताम् ।

2. अधोलिखितयोः कश्चिदेकः प्रश्नः समाधेयः । 10

   क) सांख्यसम्मता सृष्टिप्रक्रिया यथाग्रन्यम् आलोच्यताम् ।

   ख) सांख्यमते प्रमाणं कतिविधम् ? कानि च तानि ? तेषु दृष्टप्रमाणं सविस्तरम् आलोच्यताम् ।

3. अधोलिखितेषु यथेच्छं प्रश्नत्रयं समाधेयम् । 2×3

   क) सोदाहरणं लक्षणलक्षणं निरूप्यताम् ।

   ख) ''लिङ्गपरामर्शोऽनुमानम्''— इत्यत्र परामर्शो नाम किम् ।

   ग) 'संक्षिप्तयुक्त्यन्विततर्कभाषा'—इत्यत्र कः समासः?

   घ) के तावत् अयुतसिद्धपदार्थाः?

   ङ) ''यत्र मैत्रीतनयत्वं तत्र श्यामत्वमि'' त्यत्र व्याप्तिरस्ति न वेति कथम् ?

4. अधोलिखितेषु यथेच्छं प्रश्नत्रयं समाधेयम् । 2×3

   क) सत्कार्यसाधकाः हेतवः के ?

   ख) सांख्यमते कानि तत्त्वानि ? कानि च तानि ?

   ग) सांख्यमते प्रधानस्यानुपलब्धौ को हेतुः ?

   घ) प्रकृतेः स्वरूपं किम् ?

   ङ) सांख्यमते कति गुणाः? के च ते ?

5. व्याख्यायताम् — 8

   क) 'तच्चानुमानं द्विविधम्' ।

   अथवा

   ख) 'दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।

—o—